# अथ श्रीमद्भागवतदशमस्कंधार्था-नुक्रमणिका ।

श्रीकृष्णाय नमः ।

राजप्रश्नो हरेर्जन्मकारणं भूमिसांत्वनम् ॥
कंसबोधनषट्पुत्रवधः कंसभयं नृषु ॥१॥
मायाज्ञापनदेवादिस्तुतिः कृष्णसमुद्भवः ॥
वर्णनं कृष्णरूपस्य वसुदेवस्य संस्तुतिः ॥२॥
देवक्यादिपुराकृत्यकथनं जगदीशितुः ॥
गोकुले नयनं कन्यामारणे तद्विभाषणम् ॥३॥
सांत्वनं वसुदेवस्य मोचनं भार्यया सह ॥
कंसदुर्मंत्रदैत्येषु साधुबालउपद्रवः ॥४॥
प्रादुर्भूते व्रजे कृष्णे व्रजराजमहोत्सवः ॥
मथुरागमनं नंदवसुदेवसमागमः ॥५॥
पूतनास्तुपयःपानं नंदगोपादिविस्मयः ॥
शाकटव्यत्ययो दैत्यचक्रवातवधः शिशोः ॥६॥
संलालने मुखे धात्र्या जृंभणे विश्वदर्शनम् ॥
रामकेशवयोर्नाम्नः करणं केलिरेतयोः ॥७॥
चौर्यं गोपवधूगेहे प्रसंगाद्भक्षणं मृदः ॥
दर्शनं विश्वरूपस्य नंदभाग्यपुराकथा ॥८॥

चौर्यं हैयंगवस्याथ बंधनं दामभिर्बलात् ॥
यमलार्जुनताशापो भंगश्चैव स्तुतिस्तयोः ॥९॥
बालक्रीडोपनंदादिमंत्रणं गमनं ततः ॥
वृंदावने तयोः क्रीडा वयस्यैर्वनचारिणोः ॥१०॥
वत्सासुरस्य च वधो बकाघासुरयोरपि ॥
भोजनं सखिभिस्तीरे यमुनाया हरेर्मुदा ॥११॥
वत्सापहरणं[1] धात्रा कृष्णत्वं वत्सपालयोः ॥
ब्रह्मणो मोहगमनं स्तुतिः कृष्णरतिर्गतिः ॥१२॥
गोचारणे महाकायधेनुकादिवधस्तथा[2] ॥
व्रज आगमनं कृष्णो[3] गोपीनेत्रमहोत्सवः ॥१३॥
मृतान् विषांभः पानेन गोपान् हरिरजीवयत् ॥
कालीयदमने स्तोत्रं तद्भार्याणां प्रलापनम् ॥१४॥
ह्रदे कालीयसंबंधकथनं वह्निमोचनम् ॥
क्रीडाप्रलंबनिधनं दावाग्नेर्मोचनं गवाम् ॥
वर्षाशरद्वर्णनं च गोपीनां वचनामृतम् ॥१५॥
व्रतं गोकुलकन्यानां वस्त्राणां हरणं मुदा ॥
वनभाग्यकथा गोपप्रार्थना प्रेषणं मखे ॥१६॥
विप्रभार्याप्रसादश्च पश्चात्तापो द्विजन्मनाम् ॥
यागभंगो महेंद्रस्य धृतिर्गोवर्धनस्य च ॥१७॥

१ वत्साद्यपहरणं. २ वधस्ततः, ३ व्रजे कृष्णस्यागमनं इति मम प्रतिभाति.

सुरेंद्रगर्वहरणं गर्गगीतस्य वर्णनम् ॥
गोपशंकापगमनमिंद्रधेन्वभियाचनम् ॥१८॥
नंदस्य मोक्षणं गोपवैकुंठागमनं ततः ॥
पंचाध्याय्यां निशि क्रीडा सर्पान्नंदस्य मोक्षणम् ॥१९॥
शंखचूडवधः पश्चाद् गोपीगीतं वृषार्दनम् ॥
कंसनारदसंवादः कंसाक्रूरकथा ततः ॥२०॥
केशिनो निधनं कृष्णान्नारदर्षिकथा ततः ॥
व्योमासुरवधोऽक्रूरागमनं गोकुलेषु[1] च ॥२१॥
दर्शनानंदहृष्टात्मरोमांचो गद्गदा गिरः ॥
संवादो रामकृष्णाभ्यां वर्णितं कंसचेष्टितम् ॥२२॥
रामकृष्णप्रयाणं च तथा गोपीप्रलापनम् ॥
मथुरागमनं मध्ये ह्रदे कृष्णस्य दर्शनम् ॥२३॥
स्तुतिः पुरगतिः पश्चाद्दर्शनं पुरसंपदः ।
रजकस्य शिरश्छेदो वायकस्य वरादयः ॥२४॥
सुदाम्नो वरदानं च कुब्जासंदर्शनं हरेः ।
धनुर्भंगः सैन्यवधः कंसदुर्हेतुदर्शनम् ॥२५॥
रंगोत्सवे कुवलयापीडयुद्धविघातनम् ।
दर्शनं रामकृष्णस्य पौराणां प्रेमदर्शनम् ॥२६॥
मल्लानां निधनं रंगे कंसस्य सह बंधुभिः ।
पित्रोश्च सांत्वनं सर्वसुहृदां परितोषणम् ॥२७॥

---

१ नंदगोकुले.

उग्रसेनाभिषेकश्च नंदादिव्रजप्रेषणम् ।
ईषद्द्विजातिसंस्कारः पठनं च गुरोर्गृहे ॥२८॥
मृतपुत्रप्रदानं च गुरोः पंचजनार्दनम् ।
पुनरागमनं शौरेर्मधुपुर्यां महोत्सवः ॥२९॥
उद्धवप्रेषणं गोपीविलापपरिसांत्वनम् ।
कुब्जारतिस्तथाक्रूरप्रेषणं गजसाह्वये ॥३०॥
पांडवेषु च वैषम्यं धृतराष्ट्रस्य बोधनम् ।
इत्येवं दशमस्कंधपूर्वार्धे विनिरूपितम् ॥३१॥
जामातृवधसंतप्तजरासंधचमूवधः ।
बहुशः सेनयोद्वेगो द्वारकादुर्गकारणम् ॥३२॥
यवनस्य वधो दृष्टया मुचुकुंदस्य संस्तुतिः ।
वरं दत्त्वा ततो म्लेच्छवधं कृत्वा धने ततः ॥३३॥
नीयमाने वरैर्दृप्तजरासंधात्पलायनम् ।
रैवताद्रेवतीकन्या बलदेवसमर्पणम् ॥३४॥
रुक्मिणीप्रियसंदेशश्रवणादखिलान्रिपून् ।
निर्जित्य निर्गमो गेहादंबिकाया हृतिर्बलात् ॥३५॥
चैद्यसांत्वनमुर्वीशैस्ततो रुक्मिसमागमः ।
युद्धाक्षेपापराधे च मुंडनं तस्य कृष्णतः ॥३६॥
रुक्मिणीदुःखशमनं रामवाक्यं च मोक्षणम् ।
ततो विवाहो रुक्मिण्या विधिवत्स्वपुरे तदा ॥३७॥

---

१ मुदा.

प्रद्युम्नोत्पत्तिकथनं हरणं सूतिकागृहात् ।
मायावत्योक्तवृत्तांतः शंबरस्य वधस्ततः ॥३८॥
पुनरागमनं गेहे संतोषो द्वारकौकसाम् ।
सूर्यात्स्यमंतकप्राप्तिर्याचनं तस्य वै हरेः ॥३९॥
तत्संबंधात्प्रसेनस्य वधोऽकीर्तिर्हरेस्तथा ।
तन्मार्जनाय ऋक्षस्य गेहे गमनमेतयोः ॥४०॥
ज्ञात्वा सुरर्षभं युद्धाज्जांबवत्याः समर्पणम् ।
सत्राजितस्य प्राप्तस्य स्वतो दानं मुरारिणा ॥४१॥
विवाहः सत्यभामाया दत्तायाः प्रीतये हरेः ।
रामेण सह कृष्णस्य गमनं गजसाह्वये ॥४२॥
अक्रूरकृतवर्मभ्यां प्रेरिताच्छतधन्वनः ।
सत्राजितवधो मध्ये कृष्णाच्छतधनोर्वधः ॥४३॥
रामस्य मिथिलायात्रा गदाशिक्षा सुयोधने ।
अक्रूरमणिदानं च शक्रप्रस्थे हरेर्गतिः ॥४४॥
कालिंद्या संगतिः शौरेर्विवाहः स्वपुरे ततः ।
मित्रविंदाहृतिर्नाग्नजित्युद्वाहोऽत एव च ॥४५॥
भद्राया लक्ष्मणायाश्च विवाहो मुरघातिना ।
पितुस्तत्तनयानां च नरकस्य च घातनम् ॥४६॥
भूमिस्तुती राजकन्याप्रेषणं स्वपुरे ततः ।
गत्वा महेंद्रभवनं पारिजाताहृतिर्बलात् ॥४७॥

१ वासो. २ मुदेव च. ३ पीठतत्तयानां.

उद्वाहो राजकन्यानां रुक्मिणीकृष्णकौतुकम्।
कृष्णभार्याकथा पुत्रनामान्युद्वाहपर्वणि ॥४८॥
रामाद्रुक्मिवधो द्यूते बाणस्य हरसंकथा।
उषास्वप्नकथा चित्रलेखया हरणं हरेः ॥४९॥
पौत्रस्य बंधनं चापि बाणयादवसंयुगे।
कृष्णशंकरयोर्युद्धं ज्वरसंस्तवनं ततः ॥५०॥
बाणबाहुच्छिदा रुद्रस्तुतिर्बाणाभयं वरः।
उषाप्राप्तिर्नृगाख्यानं बलभद्रव्रजागमः ॥५१॥
गोपीविलापो रामस्य स्तुतिर्गोपीभिरेव च।
यमुनाकर्षणं काशीपतिपौंड्रकघातनम् ॥५२॥
काशिदाहः स्वकृत्योतो[1] द्विविदस्य बलाद्वधः।
लक्ष्मणाहरणं रामविक्रमो गजसाह्वये ॥५३॥
नारदेन हरेर्लीलादर्शनं गृहमेधिनाम्[2]।
आह्निकं वासुदेवस्य राज्ञां विज्ञापनं त्वृषेः ॥५४॥
मंत्रणादुद्धवस्येंद्रप्रस्थे गमनमीशितुः।
जरासंधवधःस्तोत्रं राज्ञां सत्कृतिरेव च ॥५५॥
राजसूये हरेः पूजा शिशुपालवधस्तथा।
दुर्योधनाभिमानस्य भंगः प्रद्युम्नशाल्वयोः ॥५६॥
युद्धं त्रिणवरात्रं च हरेरागमनं ततः।
शाल्वस्य दंतवक्रस्य तद्भ्रातुर्लीलया वधः ॥५७॥

१ स्वकृत्यादि. २ गृहमेधिनः.

तीर्थयात्राथ रामस्य मध्ये सूतवधस्ततः ।
तत्पुत्रस्थापनं तत्र बल्वलस्य वधस्ततः ॥५८॥
यात्रासमस्ततीर्थानामृषिभिर्याजनं बलात् ।
भक्तानां जन्मसाफल्यं पृथुकाख्यानमेव च ॥५९॥
सूर्योपरागे निखिलैः कुरुक्षेत्रे समागमः ।
बंधुभिर्वसुदेवस्य गोपिकापरिसांत्वनम् ॥६०॥
कृष्णभार्याविवाहानां कथनं विस्मयो नृणाम् ।
ऋषीणां गमनं तत्र कृष्णेन प्रतिपूजनम् ॥६१॥
वसुदेवस्य संप्रश्नो नारदोक्तिरथोत्तरम् ॥
याजनं तस्य ऋषिभिः प्रमोदोऽखिलदेहिनाम् ॥६२॥
वसुदेवस्य विज्ञानं देवक्याः षट्सुतागमे ॥
बलिकृष्णस्तुतिकथा षण्णां गमननिर्गमे ॥६३॥
सुभद्राविजयोद्वाहो मिथिलागमनं हरेः ॥
मैथिलश्रुतदेवाभ्यां पूजनं गतिरेतयोः ॥६४॥
वेदस्तुतिर्हरेर्भक्त्या दारिद्र्यविनिरूपणम् ॥
आशुतोषकथा शंभोरनर्थोऽस्य वरस्य च ॥६५॥
वृकासुरवधे बुद्धेर्मोचनं गिरिजापतेः ॥
मृतपुत्रप्रदानं च विप्रस्य स्वालयाद्धरेः ॥६६॥
हरेरेवास्ति देवत्वं भृगुवाक्यैश्च निश्चयः ॥
क्रीडा स्त्रीभिर्हरेः पूजा विरहात् स्त्रीविभाषणम् ॥६७॥

महारथानां नामानि हरेर्वंशावलिस्तथा ॥
यादवानंत्यमित्येवमुत्तरार्धे निरूपितम् ॥६८॥

इति श्रीमद्वल्लभदीक्षितविरचिता श्रीमद्भागवतदशमस्कंधार्थानुक्रमणिका समाप्ता ।

# अथ गायत्रीभाष्यम् ।

श्रीकृष्णाय नमः ।

ॐभूर्भुवः स्वः ॐतत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः प्रचोदयात् ॥ अस्यायमर्थः ॥ यद्यपि प्रणवो व्याहृतयश्च तथा भवंति । तथापि तेषामर्थः स्पष्ट एवेति गायत्र्यर्थो निरूप्यते गायत्र्यंतर्गततच्छब्दव्याख्यानं सत्यं परमिति कालत्रयाबाधितं सर्वलोकप्रसिद्धं सत्यं परं श्रेष्ठं पुरुषोत्तमरूपं सर्ववेदप्रसिद्धमिति सवितुरित्युक्तम् प्रसवितुरिति। गायत्री हि वेदमाता वेदत्रयार्थ प्रतिपादिका भवति । तेन निर्विघ्नवाक्प्रसवार्थं गायत्र्या भगवदुपस्थानं कुर्वाणाः गायत्र्यर्थमाहुः । तेन गायत्र्या जगत्प्रसूत्वेन सर्वकर्तृत्वम् । यथा कामधेनोः कल्पवृक्षाच्चिंतामणेर्मंत्रादेश्च जायमानाः पदार्था दृश्यंते न हि ते विकृता भवंति । चतुर्विधपुरुषार्थसिद्ध्यर्थं जगज्जन-